ऐनिलस्य तु दुष्मन्तो भरतस्तस्य चात्मजः ।
शकुन्तलायां संजज्ञे वितथो भरतादभूत् ॥
वितथस्य मन्युः पुत्त्रो मन्योश्चैव नरः सुतः ।
नरस्य संकृतिः पुत्त्रः सुसन्धिः संकृतेः सुतः ॥”
सुसन्धिस्थाने गर्गश्च इति पाठः ।
“गर्गादमन्युपुत्त्रो वै शिनिस्तस्य व्यजायत ।”
अमन्युस्थाने भुमन्युरिति च पाठः ।
“अमन्योश्च महावीर्य्यादुरुक्षयः सुतोऽभवत् ॥
उरुक्षयात् त्र्यारुणिर्बृहत्क्षत्राच्च मन्युजात्
सुहोत्रस्तस्य हस्ती च अजमीढ़द्विमीढ़कौ ॥
हस्तिनः पुरुमीढ़श्च कण्वोऽभूदजमीढ़तः ।
कण्वान्मेधातिथिर्जज्ञे यतः काण्वायना द्विजाः ॥
अजमीढ़ाद्बृहदिषुस्तत्पुत्त्रश्च बृहद्धनुः ।
बृहत्कर्म्मा तस्य पुत्त्रस्तस्य पुत्त्रो जयद्रथः ॥
जयद्रथाद्विश्वजिच्च सेनजिच्च तदात्मजः ।
रुचिराश्वः सेनजितः पृथुसेनस्तदात्मजः ॥
पारस्तु पृथुसेनस्य पारान्नीपोऽभवन्नृपः ।
नीपस्य समरः पुत्त्रः सुकृतिस्तु ततोऽभवत् ॥
विभ्राजः सुकृतेः पुत्त्रो विभ्राजादनुहोऽभवत् ।
कृत्यां तस्माद्ब्रह्मदत्तो विश्वक्सेनस्तदात्मजः ॥
यवीनरो द्विमीढस्य धृतिमांश्च यवीनरात् ।
धृतिमतः सत्यधृतिर्दृढ़नेमिस्तदात्मजः ॥
दृढ़नेमेः सुपार्श्वोऽभूत् सुपार्श्वात् सन्नतिस्तथा ।
कृतस्तु सन्नतेः पुत्त्रः कृतादुग्रायुधोऽभवत् ॥
उग्रायुधाच्च क्षेम्योऽभूदम्बरीषस्तदात्मजः ।
पुरञ्जयस्त्वम्बरीषात् तस्य पुत्त्रो विदूरथः ॥”
अम्बरीषस्थाने सुवीर इति च पाठः ।
“अजमीढ़ान्नलिन्याश्च नीलो नाम सुतोऽभवत्
नीलाच्छान्तिरभूत् पुत्त्रः सुशान्तिस्तस्य
चात्मजः ॥
सुशान्तेश्च पुरुर्जातो अर्कस्तस्य सुतोऽभवत् ।
अर्कस्य चैव हर्य्यश्वो हर्य्यश्वान्मुद्गलोऽभवत् ॥
यवीनरो बृहदिषुः काम्पिल्यः सृञ्जयस्तथा ।
पाञ्चालान्मुद्गलाज्जज्ञे शरद्वांस्तस्य चात्मजः ॥”
तस्य चात्मजस्थाने वैष्णवो महान इति च पाठः
“दिवोदासो द्वितीयश्च अहल्यायां शरद्वतः ।
शतानन्दोऽभवत् पुत्त्रस्तस्य सत्यधृतिः सुतः ॥
कृपः कृपी सत्यधृतेरुर्व्वश्यां वीर्य्यहानितः ।
द्रोणपत्नी कृपी जज्ञे अश्वत्थामानमुत्तमम् ॥
दिवोदासान्मित्रयुश्च मित्रयोश्च्यवनोऽभवत् ।
सुदासश्च्यवनाज्जज्ञे सौदासस्तस्य चात्मजः ॥
सहदेवस्तस्य पुत्त्रः सहदेवात्तु सोमकः ।
जन्तुस्तु सोमकाज्जज्ञे पृषतश्चापरो महान् ॥
पृषतात् द्रुपदो जज्ञे धृष्टद्युम्नस्ततोऽभवत् ।
धृष्टद्युम्नात् धृष्टकेतुरृक्षोऽभूदजमीढ़तः ॥
ऋक्षात् संवरणो जज्ञे कुरुः संवरणादभूत् ।
सुधन्वश्च परिक्षित्तु जह्नुश्चैव कुरोः सुताः ॥
सुधनुषः सुहोत्रोऽभूत् च्यवनोऽभूत सुहोत्रतः ।
च्यवनात् कृतको जज्ञे अथोपरिचरो वसुः ॥
बृहद्रथश्च प्रत्यग्नः सत्याद्याश्च वसोः सुताः ।
बृहद्रथात् कुशाग्रश्च कुशाग्रात् ऋषभोऽभवत्॥
ऋषभात् पुष्पवांस्तस्माज्जज्ञे सत्यहितो नृपः।

सत्यहितात् सुधन्वाभूज्जह्नुश्चैव सुधन्वतः ॥”
जह्नुस्थाने जन्तुरिति च पाठः ।
“बृहद्रथाज्जरासन्धः सहदेवस्तदात्मजः ।
सहदेवाच्च सोमापिः सोमापेः श्रुतवान् सुतः॥
भीमसेनप्रसेनौ च श्रुतसेनोऽपराजितः ।”
प्रसेनस्थाने उग्रसेन इति च पाठः ।
“जनमेजयश्चान्योऽभूज्जह्नोस्तु सुरथोऽभवत् ।
विदूरथस्तु सुरथात् सार्व्वभौमो विदूरथात् ॥
जयत्सेनः सार्व्वभौमादराधीतस्तदात्मजः ।
अयुतायुस्तस्य पुत्त्रस्तस्य चाक्रोधनः सुतः ॥
अक्रोधनस्यातिथिश्च ऋक्षोऽभूदतिथेः सुतः ।
ऋक्षाच्च भीमसेनोऽभूद्दिलीपो भीमसेनतः ॥
प्रतीपोऽभूद्दिलीपात्तु देवापिस्तु प्रतीपतः ।
शान्तनुश्चैव बाह्लीकस्त्रयस्ते भ्रातरो नृपाः ।
बाह्लीकात् सोमदत्तोऽभूत् भूरिर्भूरिश्रवास्ततः॥
शलश्च शान्तनोर्भीष्मो गङ्गायां धार्म्मिको
महान् ।
चित्राङ्गदविचित्रौ तु सत्यवत्यान्तु शान्तनोः ॥
विचित्रवीर्य्यभार्य्ये तु अम्बिकाम्बालिका तयोः
धृतराष्ट्रश्च पाण्डुश्च तद्दास्यां विदुरस्तथा ॥
व्यास उत्पादयामास गान्धार्य्यां धृतराष्ट्रतः ।
शतं पुत्त्रं दुर्य्योधनाद्यं पाण्डोः पञ्च प्रजज्ञिरे॥
प्रतिविन्ध्यः सुतः सोमः श्रुतकीर्त्तिस्तु चार्ज्जुनात्
शतानीकः श्रुतकर्म्मा द्रौपद्यां पञ्च वै क्रमात्॥
यौधेयी च हिड़िम्बा च काशी चैव शुभद्रिका
विजया वै वेणुमती पञ्चभ्यस्तु सुताः क्रमात्॥
देवको घटत्कचश्च अभिमन्युश्च सर्व्वगः ।
सुहोत्रो निरमित्रश्च परिक्षिदभिमन्युजः ॥”
अत्र अहोत्रो निरपक्षश्चेति तृतीयचरणे पाठः।
“जनमेजयश्च ततो भविष्यांश्च नृपाञ्छृणु ॥”
इति गारुड़े १४४ अध्यायः ॥
सोमवल्कः, पुं, (सोमस्येव वल्को यस्य ।) श्वेत-
खदिरः । इत्यमरः । २।४।५०॥ (अस्य पर्य्यायो
यथा,—
“सोमवल्को ब्रह्मशल्यः कदरः खदिरोपमः ॥”
इति वैद्यकरत्नमालायाम् ॥)
कट्फलः । इति मेदिनी॥(अस्य पर्य्यायो यथा,
“कट्फलः सोमवल्कश्च कैटर्य्यः कुम्भिकापि च
श्रीपर्णिका कुमुदिका भद्रा भद्रवतीति च ॥”
इति भावप्रकाशे पूर्व्वखण्डे प्रथमे भागे ॥)
करञ्जः । इति जटाधरः ॥ (अस्य पर्य्यायो यथा,
“स चोक्तः पूतिकरञ्जः सोमवल्कश्च स स्मृतः ।”
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)
रीठाकरञ्जः । इति राजनिर्घण्टः ॥
सोमवल्लरिः, } स्त्री, (सोमस्य वल्लरिः । वा
सोमवल्लरी, } ङीष् ।) सोमलता । तत्पर्य्यायः ।
ब्राह्मी २ मत्स्याक्षी ३ वयःस्था ४ । इत्यमरः ।
२ । ४ । १३७ ॥ चत्वारि सोमलतायाम् ।
ब्राह्मीशाक इति केचित् । अतिपवित्रत्वेन
ब्रह्मणः प्रियत्वात् ब्रह्मणो ब्राह्मणस्य वा इयं
ब्राह्मी अणः नञा निर्द्दिष्टं व्यभिचरतीति मन-
वर्ज्जानिति निषेधाभावे नोर्लोपौ ताविति नस्य

लोपः णित्त्वे व्रिरिति वृद्धिः षित्वादीप् अनित-
मेत्युक्तेर्णित्त्वाभावविवक्षया वृद्ध्यभावे ब्रह्मी च
“ब्राह्मी वयःस्था मत्स्याक्षी ब्रह्मी च सोम-
वल्लरी ।”
इति वाचस्पतिः ॥
मत्स्याक्षितुल्यपुष्पत्वात् मत्स्याक्षी । वयो यौवनं
तिष्ठत्यनया वयःस्था भिदादित्वात् ङः मध्य-
विसर्गा मनीषादित्वात् विसर्गलोपे निर्व्विसर्गा
च । सोमेन यागार्थमुपात्तेति सोमवल्लरी अर्थ-
परत्वात् इन्दुवल्लरी चन्द्रवल्लरी इत्याद्यपि ।
वल्लर्य्या लतार्थपरत्वात् सोमवल्ली सोमलता
सोमवल्लिका इत्याद्यपि पाठः । इति भरतः ॥
सोमवल्लिका, स्त्री, (सोमवल्लीव । इवार्थे कन् ।)
सोमराजी । इत्यमरः । २।४।८५ ॥ (सोमस्य
वल्लिका ।) सोमलता । इति भरतः ॥
सोमवल्ली, स्त्री, (सोमस्य वल्लीव ।) गुड़ूची ।
इत्यमरः । २।४।४३ ॥ सोमलता इति तट्टी-
कायां भरतः ॥ सोमराजी । इति शब्दरत्ना-
वली ॥ पातालगरुड़ी । ब्राह्मी । सुदर्शना ।
इति राजनिर्घण्टः ॥(यथा, बृहत्संहितायाम् ।
५४ । १०८ ।
“या सोमवल्ल्याश्च समानरूपा
साप्याशु तोयं कुरुतेऽक्षयञ्च ॥”)
सोमवारः, पुं, (सोमस्य वारः ।) सोमस्य भोग्य-
दिनम् । चन्द्रवासरम् । यथा,—
“सोमवारेऽप्यमावास्या आदित्याहे च सप्तमी
चतुर्थी भौमवारे च अक्षयादपि चाक्षया ॥”
इति तिथ्यादितत्त्वम् ॥ * ॥
तद्दिवसीयवारवेला यथा,—
“रवौ वर्ज्यं चतुः पञ्च सोमे सप्त द्वयं तथा ।”
इति ज्योतिःसागरसारः ॥
तद्रात्रौ कालवेला यथा,—
“रवौ षष्ठं विधौ वेदं कुजवारे द्वितीयकम् ।
बुधे सप्त गुरौ पञ्च भृगुवारे तृतीयकम् ।
शनावाद्यं तथा चान्तं रात्रौ कालं विवर्ज्जयेत्॥”
इति ज्योतिःसारः ॥
सोमवारव्रतं, क्ली, (सोमवारकर्त्तव्यं व्रतम् ।)
प्रतिसोमवारोपवासपूर्व्वकसायंकालकर्त्तव्यशिव-
दुर्गापूजारूपव्रतविशेषः । तद्विवरणं यथा,—
“सोमवारे विशेषेण प्रदोषादिगुणैर्युते ।
केवलं वापि ये कुर्य्युः सोमवारे शिवार्च्चनम् ।
न तेषां विद्यते किञ्चिदिहामुत्र च दुर्लभम् ॥
उपोषितः शुचिर्भूत्वा सोमवारे जितेन्द्रियः ।
वैदिकैर्लौकिकैर्व्वापि विधिवत्पूजयेच्छिवम् ॥
ब्रह्मचारी गृहस्थो वा कन्या वापि सभर्त्तृका ।
विभर्त्तृका वा संपूज्य लभते वरमीप्सितम् ॥*॥
तत्राहं कथयिष्यामि कथां श्रोत्रमनोरमाम् ।
श्रुत्वा श्रुतधियः शम्भोर्भक्तिं कुर्व्वन्तु निश्चलाम्
आर्य्यावर्त्ते नृपः कश्चिदासीद्धर्म्मभृतां वरः ।
चित्रवर्म्मेति विख्यातो धर्म्मराजो दुरात्मनाम्॥
सोऽनुकूलः स्वपत्नीषु पुत्त्रमेकं न लब्धवान् ।
चिरेण प्रार्थितां लेभे कन्यामेकां मनोहराम्॥